नर्मसंग्रह प...

॥३८॥

6177

F — 18

Complete

तर्कसंग्रहटीका पदकृत्य श्लो० ५६०

नं ३८

प्रसज्यते इति ।=४

लक्षणे दोषपरिहारः परीक्षायाः फलं मंतव्यम् । एवमुद्देशलक्षणयोरपि =८

॥ ॐ श्रीगणेशाय नमः ॥ श्रीगणेशं नमस्कृत्य पार्वतीशंकरं परं मया चन्द्रजसिंहेन क्रियते पदकृत्यकम् १ यस्मादिदमहं
मन्ये बालानामुपकारकं तस्माद्धितकरं वाक्यं वक्तुं यंथि दुग्धाम्परं विश्वेशं जगत्कर्तारं श्रीसांबमूर्त्तिं हृदि मनसि निधाय
नितरां धारयित्वा गुरुवंदनं च विधायेत्यर्थः ॥ बालेति ॥ अनधीतव्याकरणकाव्यकोशान धीतन्यायशास्त्रो बालः
न्यासादावतिव्याप्तिनिरासाय अनधीतन्यायेति सुखं धर्येति प्रसक्तिनिवारणाय अधीतव्याकरणेति ॥ सुखेति ॥
सुखेनानायासेन बोधाय पदार्थतत्त्वज्ञानायेत्यर्थः तर्क्यन्ते प्रमितिविषयी क्रियंते इति तर्काः द्रव्यादिपदार्था
स्तेषां संग्रहः संक्षेपेण स्वरूपकथनं क्रियते संक्षेपेणोद्देशलक्षणपरीक्षायस्मिन्स ग्रंथः नाममात्रेण वस्तु
संकीर्त्तनमुद्देशः यथा द्रव्यं गुण इति असाधारणधर्मो लक्षणं यथा गंधवत्त्वं पृथिव्याः लक्ष्ये लक्षणं संभवति
न वेति विचारः परीक्षा अत्रोद्देशस्य पदज्ञानं फलं लक्षणस्येतरभेदज्ञानं फलं परीक्षाया लक्षणे दोषपरिहार इति मं
तव्यं ॥ द्रव्येति ॥ तत्रेति । तत्र सप्तपदार्थमध्ये इत्यर्थः द्रव्याणि नवेत्यन्वयः एवं तत्रेति पदं चतुर्विंशति गुणा इ
त्यादिनाप्यन्वेति द्रव्यत्वजातिमत्त्वं गुणवत्त्वं समवायिकारणत्वं वा द्रव्यसामान्यलक्षणं ॥ रूपेति ॥ कर्मा
णीति ॥ परमपरं चेति ॥ परसामान्यमपरसामान्यमित्यर्थः परत्वं चाधिकदेशवृत्तित्वं अपरत्वं च न्यू
नदेशवृत्तित्वं तदेव हि लक्षणं यद्व्याप्त्याकाशादिवारणाय असाधारणेत्यपि बोध्यं ॥ तिव्याप्त्यसंभ
वरूपदोषत्रयशून्यं यथा गोः सास्नादिमत्त्वं अव्याप्तिश्च लक्ष्यैकदेशावृत्तित्वं अतएव गोर्न कपिलत्वं
लक्षणं तस्याव्याप्तिग्रस्तत्वात् अतिव्याप्तिश्च लक्षवृत्तित्वे सत्यलक्ष्यवृत्तित्वं अतएव गोर्न शृंगित्वं लक्षण
णं तस्यातिव्याप्तिग्रस्तत्वात् असंभवश्च लक्ष्यमात्रावृत्तित्वं यथा गोरेकशफत्वं न लक्षणं । तस्यासंभव
ग्रस्तत्वात् ॥ नित्येति ॥ ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वं ध्वंसेऽतिव्याप्तिवारणाय ध्वंसभिन्नेति विशेषणं घटादा
वतिव्याप्तिवारणाय विशेष्यदलं ध्वंसप्रतियोगित्वं प्रागभा
वप्रतियोगित्वं वाऽनित्यत्वं यद्भोगायतनं तदेव
॥ शरीरं चेष्टाश्रयो वा ॥

सुखदुःखान्यतरसाक्षात्कारो भोगः =

हिताहितप्राप्तिपरिहारा नुकूलक्रियाचेष्टा =

१
प्रमाणजन्यज्ञानस्य विषयी भूताः क्रियंते =५

तद्भिन्नतावृत्तित्वे सति तत्सकलवृत्तित्वं असाधारणत्वं लक्ष्यालक्ष्यवृत्तित्वं साधारणत्वम् ॥ =७

हिकोऽर्थः अखिलतेन प्रसिद्धं यत्तदेव लक्षणं =५

द्रव्यत्वजातिमत्त्वं द्रव्यस्य लक्षणं इत्युक्तौ लक्षणलक्षणतावच्छेदकयोरैक्यात्
सिद्धसाधनदोषः समभवदनुमितेः प्रतिबंधकः पुनः गुणवत्त्वं लक्षणमिति लक्ष
णे आद्यक्षणावच्छिन्ने द्रव्येऽव्याप्तिः कुतः उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठती
ति न्यायात् अतः समवायिकारणत्वं द्रव्यस्य सामान्यलक्षणमिति
हीनम् ॥

शिवः
१

इन्द्रियमिति ॥ चक्षुरादावतिव्याप्तिवारणाय गंधग्राहकमिति ॥ विषयेति ॥ शरीरेन्द्रियभिन्नत्वे सति उपभोगसाधनं विषयः
शरीरादावतिव्याप्तिनिरासाय सत्यंतं परमाण्वादावतिव्याप्तिवारणाय विशेष्यदलं कालादिवारणाय जन्यत्वे
सतीत्यपि बोध्यम् ॥ शीतेति ॥ तेजसादावतिव्याप्तिवारणाय शीतेति आकांक्षावारणाय स्पर्शेति कालादावति
प्रसक्तिवारणाय समवायसंबंधेनेति पदं देयं ॥ इन्द्रियमिति ॥ त्वगादावतिव्याप्तिनिरासाय रसग्राहकमि
ति रसनेन्द्रियरससन्निकर्षादावतिव्याप्तिनिरासाय इन्द्रियमिति ॥ सरिदिति ॥ आदिना तडागहिमकरका
दीनां संग्रहः ॥ उष्णेति ॥ जलादावतिव्याप्तिनिरासायोष्णेति कालादावतिप्रसंगवारणाय समवायसं
बंधेनेति पदं देयं ॥ इन्द्रियमिति ॥ घ्राणादावतिव्याप्तिवारणाय रूपग्राहकेति कालादावतिव्याप्तिनिरासा
य इन्द्रियमिति ॥ भेदादिति पदं प्रत्येकमभिसंबध्यते ॥ भौममिति ॥ आदिपदेन खद्योतगततेजःप्रभृतेः
परिग्रहः ॥ विद्युदादीति ॥ आदिना अर्कचन्द्रादीनां परिग्रहः भुक्तस्यान्नादेः पीतस्य जलस्य परिणामो जी
र्णता तस्य हेतुरौदर्यमित्यर्थः ॥ सुवर्णेति ॥ आदिना रजतादिपरिग्रहः ॥ स्पर्शेति ॥ घटादिवारणाय विशेषणं
आकाशादिवारणाय विशेष्यं ॥ इन्द्रियमिति ॥ चक्षुरादिवारणाय स्पर्शग्राहकमिति ॥ कालादिवारणायेन्द्रि
यमिति ॥ वृक्षेति ॥ आदिपदेन जलादिपरिग्रहः ॥ शरीरान्तरिति ॥ महावाय्वादावतिव्याप्तिवारणाय विशेषणं
मनआदिवारणाय विशेष्यं धनंजयवारणाय संचारीति ॥ उपाधीति ॥ मुखनासिकाभ्यां निर्गमनप्रवेश
नात्प्राणः जलादेरधोनयनादपानः भुक्तपरिणामाय जाठरानलस्य समुन्नयनात्समानः अन्नादेरूर्ध्व
नयनादुदानः नाडीमुखेषु वितननाद्व्यानः इति क्रियारूपोपाधिभेदात्तथा व्यपदिश्यत इत्यर्थः ॥ शब्दे
ति ॥ शब्दो गुणो यस्य तत्तथा असंभववारणाय शब्दगुणोभयं ॥ विभ्विति ॥ सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं ॥
अतीतेति ॥ अतीत इत्यादियो व्यवहारः अतीतो भविष्यद्वर्तमानः इत्यात्मकस्तस्य साधारणहेतुः काल इत्यर्थः ॥

नन्विदं लक्षणमाकाशेतिव्याप्तं व्यवहारस्य शब्दात्मकत्वादिति चेन्न अत्र हेतुपदेन निमित्तहेतोर्विवक्षितत्वान्न चैवं
कंठताल्वाद्यभिघातेतिव्याप्तिरिति वाच्यं विभुत्वस्यापि निवेशात् ॥ प्राचीति ॥ इयं प्राची इयमवाची इयं प्रतीची
इयमुदीचीत्यादिव्यवहारासाधारणं कारणं दिगित्यर्थः हेतुर्दिगित्युच्यमाने परमाण्वादावतिव्याप्तिः स्या
२ त्तद्वारणाय व्यवहारहेतुरिति ॥ आकाशादिवारणाय साधारणेत्यपि बोध्यं ॥ ज्ञानाधिकरणमात्मेति ॥
भूतलादिवारणाय ज्ञानेति । कालादिवारणाय समवायेनेत्यपि देयं ॥ ईश्वर इति ॥ समवायसंबंधेन नित्यज्ञा
2 नवानीश्वरः ॥ जीव इति ॥ सुखादिसमवायिकारणं जीव इत्यर्थः ॥ सुखेति ॥ आत्ममनःसंयोगादिवारण
येन्द्रियमिति ॥ चक्षुरादिवारणाय सुखेति ॥ चक्षुरिति ॥ रूपत्वादिवारणाय गुणपदं रसादिवारणाय
चक्षुर्ग्राह्येति ॥ संख्यादिवारणाय मात्रपदं ॥ यद्यपि प्रभाभित्तिसंयोगवारणाय गुणपदेन विशेषगुणस्य वि
वक्षणीयतया तत एव संख्यादिवारणं संभवति मात्रपदं व्यर्थं तथापि सांसिद्धिकद्रवत्ववारणाय तदावश्यकं ॥
वस्तुतस्तु परमाणुरूपेऽव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमत्वस्य विवक्षणीयतया विशेषपदं न देयं अ
णुकादिवारणाय गुणपदं तु देयं सत्वेति ॥ रूपमित्यनुवर्तते ॥ रसनेति ॥ रसत्वादिवारणाय गुण इति ॥ रू
पादावतिव्याप्तिवारणाय रसनेति ॥ तत्रेति ॥ पृथिवीजलयोरित्यर्थः ॥ षड्विधेति ॥ इत्यग्र रस इत्यनुवर्तते ॥ घ्राणग्राह्येति ॥ घ्रा=७
घ्राण=६ गंधत्वादावतिव्याप्तिवारणाय गुणेति ॥ रूपादावतिव्याप्तिवारणाय घ्राणग्राह्य इति ॥ पृथ्वीति ॥ पृथिवीसंबंधसत्वे गंधप्र
तीतिसत्वं पृथिवीसंबंधाभावे गंधप्रतीत्यभावः इत्यन्वयव्यतिरेकाभ्यां पृथिवीगंधस्यैव जले प्रतीतिर्बोध्या एवं वाया
वपि ॥ ननु देशान्तरस्थकस्तूरीकुसुमसंबद्धपवनस्यैतद्देशे तत्संबंधाभावाद्गंधप्रतीत्यनुपपत्तिः न च वायानीतत्र्य
णुकादिसंबंधोस्त्येवेति वाच्यं कस्तूर्या न्यूनतापत्तेः कुसुमस्य च सच्छिद्रतापत्तेरिति चेन्न भोक्तुरदृष्टविशे
षेण पूर्ववत्त्र्यणुकान्तरोत्पत्तेः । कर्पूरादौ तु तदभावान्न तथा ॥ त्वगिति ॥ स्पर्शत्वादावतिप्रसक्तिवारणाय गुण
इति रूपादावतिव्याप्तिवारणाय त्वगिन्द्रियेति संख्यादिवारणाय मात्रपदं ॥ तत्रेति ॥ पृथिव्यादिचतुष्टये ॥ शीतेति ॥

शिवः
२

॥उक्तेति॥ उष्णस्पर्शः॥ एकादीति॥ एकत्वमित्यादियो व्यवहारः एको द्वावित्यात्मकः तस्य हेतुः संख्येत्य
र्थः घटादिवारणाय एकादिरिति कालादिवारणायासाधारणेत्यपि देयं ननु संख्याया अवधिरस्ति
न वेत्यत आह। एकत्वादीति। तथा च एकं दश शतं चैव सहस्रमयुतं तथा लक्षं च नियुतं चैव कोटिरर्बुद
मेव च वृंदं खर्वो निखर्वश्च शंखः पद्मश्च सागरः अंत्यं मध्यं परार्द्धं च दशवृद्ध्या यथाक्रमं इति महदु
क्तेः परार्द्धपर्यंतैव संख्या॥मानेति॥ मानं परिमितिरिति तस्या यो व्यवहारः इदं महदिदमणित्याद्यात्मकः
तस्य कारणं परिमाणमित्यर्थः दंडादिवारणाय मानेति कालादिवारणायासाधारणेति शब्दत्ववारणा
य कारणेति॥नवद्रव्येति॥ चतुर्विधमपि परममध्यमभेदेन द्विविधं तत्र परमाणुत्वह्रस्वत्वे च पर
माणुमनसोः मध्यमाणुत्वह्रस्वत्वे द्व्यणुके परममहत्त्वदीर्घत्वे गगनादौ मध्यममहत्त्वदीर्घत्वे घटादौ
एतन्मौक्तिकादिदं मौक्तिकमणीवेति व्यवहारस्यापकृष्टमहत्त्वाद्गौणत्वं बोध्यं एवं केतनाद्भुजनं ह्रस्व
मित्यत्रापि निकृष्टदीर्घत्वाद्गौणत्वं॥पृथगिति॥ अयमस्मात्पृथगिति यो व्यवहारस्तस्य कारणं पृथक्
त्वमित्यर्थः दंडादिवारणाय पृथगित्यादि कालादिवारणायासाधारणेति पृथक्व्यवहारत्ववारणाय
कारणेति॥संयुक्तेति॥ इमौ संयुक्ताविति यो व्यवहारस्तस्य हेतुः संयोग इत्यर्थः॥ दंडादिवारणाय संयुक्ते
व्यवहारेति॥कालादिवारणायासाधारणेत्यपि देयं। संयुक्तव्यवहारत्वे प्रसक्तिवारणाय हेतुरिति॥ उपदर्शितल
क्षणचतुष्टये असाधारणपदं देयं क्वचित्पुस्तके परिमाणपृथक्लक्षणे असाधारणपदं दृश्यते तत्वाधुनि
कैर्निक्षिप्तमिति बोध्यं॥संयोगेति॥ संयोगनाशके जनक इत्यर्थः॥ कालेति व्याप्तिवारणाय गुणपदं देयं ईश्व
रेच्छादिवारणायासाधारणेत्यपि बोध्यं॥ननु असाधारणपददाने गुणपदस्य वैयर्थ्यं स्यादिति चेन्न॥

अत्राणुपदमपकृष्टमहत्त्वपरं =
संपूर्णगुणाश्रयत्वं मुख्यत्वं
किंचित्गुणाश्रयत्वं गौणत्वं =
दंडो दण्डः =६
र=२

अत्र ह्रस्वपदं निकृष्टदीर्घपरं =८

जन्यानां जनकः कालः जगतामाश्रयो मतः =६

क्रियायामति व्याप्ति वारणाय तस्या व्यावर्त्तकत्वात् ॥ परेति ॥ परव्यवहारासाधारणं कारणं परत्वं अपर व्य-
वहारासाधारणं कारणं अपरत्व मित्यर्थः दंडादिवारणाय परव्यवहारेति कालादिवारणायासाधारणेति ॥
३ परव्यवहारत्व वारणाय कारणेति एवमेव द्वितीयेपि बोध्यं ॥ आद्येति ॥ दंडादिवारणायासमवायीति रूपादि
वारणाय पतनेति वेगेति व्याप्तिवारणायाद्येति ॥ स्पंदनेति ॥ दंडादिवारणायासमवायीति ॥ रसादिवारणा
य स्पंदनेति ॥ चूर्णादीति ॥ चूर्णं पिष्टं तदेवादिर्यस्य मृत्तिकादेः स चूर्णादिस्तस्य पिंडीभावः संयोगविशेषस्त
3 स्य हेतुर्निमित्तकारणं स्नेह इत्यर्थः कालादावतिव्याप्तिवारणाय गुणपदं रूपादावतिव्याप्तिवारणाय पिं
डीभावेति चूर्णपदं स्पष्टार्थं ॥ श्रोत्रेति ॥ शब्दत्वेति व्याप्तिवारणाय गुणइति ॥ वस्तुतस्तु श्रोत्रोत्पन्नशब्द
स्यैव श्रोत्रग्राह्यत्वेन । तद्भिन्ने ऽव्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्वे तात्पर्यात् गुणपदमनुपादेय
मेव रूपादिवारणाय श्रोत्रग्राह्येति ॥ सर्वेति ॥ सर्वे ये व्यवहारा आहार विहारादयस्तेषां हेतुर्बुद्धि
रित्यर्थः ॥ दंडादिवारणाय सर्वव्यवहारेति कालादिवारणायासाधारणेत्यपि देयं ॥ संस्कारेति ॥
ध्वंसेति व्याप्तिवारणाय ज्ञानमिति अनुभवेति व्याप्तिवारणाय संस्कारजन्यमिति ॥ तथापि प्रत्यभि
ज्ञायामपि अतिव्याप्तिवारणाय संस्कारमात्रजन्यत्वं विवक्षणीयं क्वचित्तथैव पाठः नचैवं स्मृत्यसंभवः
धी=४ तस्य संस्कारजन्यत्वे सति इंद्रियार्थसन्निकर्षजन्यार्थकत्वात् तदितरत्वे सति निरूपितावच्छिन्नमित्यर्थः ·
तेन यत्किंचि । तस्मृति भिन्नस्य स्मृतेरपि न क्षतिः ॥ घटादिवारणाय ज्ञानमिति ॥ स्मृतिवारणाय तद्भिन्नमिति ॥
तद्वतीति ॥ निर्विकल्प तत्प्रकारो यस्य स तथेत्यर्थः ॥ तद्विशेष्यक तत्प्रकारक इति यावत् स्मृतिवारणायानु
भव इति ॥ अयथार्थानुभववारणाय तद्वतीति निर्विकल्पेति व्याप्तिवारणाय तत्प्रकारक इति ॥ तदभावेति ॥

के=१

शिव: ३

रजत = त रजत
घटत्वाभाववति घटत्वाभाववद्विशेष्यका शुक्तौ घटत्वप्रकारकोऽनुभवो ऽयथार्थानुभवः ॥ = २
काशकले रजतत्वप्रकारकोऽनुभवो ऽयथार्थानुभवः = १

तदभाववद्विशेष्यकतत्प्रकारकोऽनुभवो यथार्थानुभव इत्यर्थः यथा शुक्ताविदं रजतमिति ज्ञानं स्मृतिवारणाया नुभव इति यथार्थानुभववारणाय तदभाववतीति निर्विकल्पकत्वखंडनाय तत्प्रकारक इति यथार्थानुभवः प्रत्यक्षमिति चार्वाकाः अनुमितिरपीति कणादबौद्धाः उपमितिरपीति नैयायिकैकदेशिनः शाब्दमपी ति नैयायिकाः अर्थापत्तिरपीति प्राभाकराः अनुपलब्धिकोपीति भाट्टवेदांतिनो संभाविकैतिह्यकावपी ति पौराणिकाः चेष्टाकोपीति तांत्रिकाः एतेषांमते असवरसंभाव्य तस्य चातुर्विध्यं स्वयं दर्शितं ॥ तदिति ॥ य थार्थानुभवात्मकप्रमायाः करणमित्यर्थः ॥ कालादिवारणायासाधारणेति ॥ व्यापा रेति व्याप्तिवारणाय व्यापारवदिति विदेयं व्यापारश्च द्व्यान्यत्वे सति तज्जन्यत्वे सति तज्जनकः ईश्वरे कुलालादिवार णाय तज्जन्यत्वे सति कुलालजन्यत्वे सति कुलालजन्यघटजनकत्व कुलालपुत्रस्याप्यस्त्यत तत्रा तिव्याप्तिवारणाय प्रथमं सत्यंतं दंड रूपादिवारणाय तज्जन्यजनक इति ॥ अनन्यथेति ॥ कार्या न्नियतावश्यंभावनी पूर्ववृत्तिः पूर्ववृत्त एव वृत्तिर्यस्य तत्तथेत्यर्थः अनियतरासभादिवारणाय नियतेति कार्य्य त्वादिवारणाय पूर्वेति दंडत्वादिवारणायानन्यथासिद्धविशेषणत्वस्यावश्यकत्वेन तत एव रासभादिवा रणसंभवे नियतपदमनर्थकमेवं चानन्यथासिद्धकार्य्यपूर्ववृत्तिकरणमिति फलित अनन्यथासिद्धत्वम न्यथासिद्धिशून्यत्वम् अन्यथासिद्धश्चावश्यक्लृप्तनियतपूर्ववर्त्तिनएव कार्य्यसंभवे तत्सहभूतत्वं य थावश्यक्लृप्तनियतपूर्ववर्तिभिर्दण्डादिभिरेव च घटरूपकार्यसंभवे तत्सहभूतदंडत्वादेरन्यथासिद्धत्वं ॥ प्रागिति ॥ कालादिवारणाय प्रागिति ॥ असंभववारणाय प्रतियोगीति ॥ यदिति ॥ यस्मिन्समवायसंबंधेन व र्तमानं तदिति भावः ॥ चाक्षादिवारणाय समवेतमिति ॥ कार्येति ॥ कार्य्येण कारणेन वा सह कस्मिन्नर्थे समवेत

त्वे सति आत्मविशेषगुणभिन्नत्वे सति यत्कारणं तदसमवायि ॥ कारणम् ॥

|| घटत्ववति घटे घटत्वप्रकारकोऽनुभवो यथार्थानुभवः यथा घटोऽयमिति =
|| रजतत्वाभाववति शुक्तौ सकलरजतत्वप्रकारकोऽनुभवो ऽयथार्थानुभवः यथा शुक्ताविदं रजतमिति ||=

ग्राह्यैकारणपदं देयं = २

४

५

तंतुसंयोगा[illegible]वसे व्याप्तिवारणाय कार्य्येणेति तंतु नूपादावर्त्तिव्याप्तिवारणाय ॥ आत्मविशेषगुणेति व्याप्तिवारणाय आत्मविशेषगुणभिन्नत्वे सति इति विशेषवारणाय कारणेति ॥ तदुभयभिन्नं कारणं निमित्तकारणमिति समवाय्यसमवायिकारणाय तदुभयभिन्नमिति विशेषादावर्त्तिव्याप्तिवारणाय कारणेति ॥ तदेतदिति ॥ यस्मात्कारणात्करणत्वे घटकं कारणमुपदर्शितं तस्मादेतत्त्रिविधं साधकमध्ये यत्साधकतमं तदेव करणमिति ॥ भावः ॥ इतिकरणप्रमाणं ॥ तत्रेति ॥ प्रमाणचतुष्टयमध्ये ॥ दंडादिवारणाय ज्ञानेति ॥ अनुमानादिवारणाय प्रत्यक्षेति ॥ इंद्रियार्थेति ॥ इन्द्रियं चक्षुरादिकमर्थो घटपटादिस्तयोः सन्निकर्षः संयोगादिस्तज्जन्यं ज्ञानं प्रत्यक्षमित्यर्थः सन्निकर्षध्वंसवारणाय ज्ञानमिति अनुमित्यादिवारणायेंद्रियार्थसन्निकर्षेति ननु सौरेण चक्षुषा कथं पदार्थग्रहणं चक्षुष उपनेत्रनिरुद्धत्वेन पदार्थेन सह सन्नि-

जा = ९ कर्षाभावात्कथं च स्वच्छगांगवीसलिलांतर्गतमत्स्यादेश्चक्षुषा ग्रहणमिति चेन्न स्वच्छद्रव्यस्य तेजोनिरोधकत्वाभावेन तदंतश्चक्षुः प्रवेशसंभवात् ॥ न चेश्वरप्रत्यक्षेऽव्याप्तिरिति वाच्यं अत्र जन्यप्रत्यक्षस्यैव लक्षितत्वात् ॥ तत्रेति ॥ प्रकारेति ॥ सविकल्पकेति व्याप्तिवारणाय निष्प्रकारकमिति ॥ प्रकारवारणाय ज्ञानमिति ॥ सप्रकारेति ॥ घटादिवारणाय ज्ञानमिति ॥ निर्विकल्पकवारणाय सप्रकारकमिति ॥ तच्च प्रत्यक्षं षड्विधं ॥ घ्राणज रासन चाक्षुषश्रोत्र त्वाच मानसभेदात् ननु प्रत्यक्षकारणीभूतेंद्रियेषु प्रत्यक्षसामानाधिकरण्यघटकः सन्निकर्षकः इत्यपेक्षायां तं विभज्य दर्शयति ॥ प्रत्यक्षेति ॥ लौकिकप्रत्यक्षइत्यर्थः ॥ संयोगमुदाहरति । चक्षुषइति ॥ तथा च द्रव्यचाक्षुषत्वाच मानसेषु संयोग एव सन्निकर्षः इति भावः । घटरूपेति ॥ चक्षुषाजननइत्यनुषज्यते तथा च द्रव्यसमवेतात्मकंय त्सामान्यं तत्प्रत्यक्षमित्यर्थः ॥ अत्रापि चक्षुषाजननइत्यनुषज्यते तथाच द्रव्यसमवेतचाक्षुष

च = १

रसनचाक्षुषजप्रत्यक्षे तमानमिष्ठ संयुक्तसमवेतसमवायएवसन्निकर्षः ॥ षड्इतिभावः ॥ ॥ चाक्षुषत्वावच्छिन्नसमवायःसंयुक्तसमवेतसमवायःसन्निकर्षः ॥

के =

शिवः
४

जन्यानां जनको कालः जगतामाश्रयो मतः =

को=३

श्रोत्रेण शब्दसाक्षात्कारे जननेसतीत्यर्थः =२

॥ अथ द्रव्य तत्समवेत प्रत्यक्षेपि संयुक्तसमवेतसमवाय एव सन्निकर्ष इत्यवितिचेन्न तत्तसार्थ आत्मादेरनध्यक्षत्वप्रसंगात् ॥ समवायसन्निकर्षमुदाह
रति ॥ श्रोत्रेणेति ॥ शब्दसाक्षात्कारे इति जननइति विशेष ॥ ननु श्रोत्रशब्दयोः कथं समवाय इति अपेक्षमाणं प्रति तमुपपाद्य दर्शयति कर्णेति ॥ श्रो
समवायस्य नित्यत्वेन शब्द प्रत्यक्षे व्यापार इति चेन्न शब्द श्रोत्रमनःसंयोगो वेति द्रष्टव्यं ॥ विशेषणेति ॥ विशेषणभावो विशेष्यभावश्चेति बोध्यं ॥
॥ इंद्रियसंबंध विशेष्यत्व मिति यावत् ॥ विशेषणभाव सन्निकर्षमुपपाद्य दर्शयति ॥ घटाभाववदिति ॥ इह भूतले घटो नास्तीत्यादौ वि
शेष्यता सन्निकर्षोपि ज्ञेयः ॥ सन्निकर्षं तस्य विशेषणत्वात् ॥ प्रत्यक्षप्रमाणमुपसंहरति ॥ एवमुपदर्शितक्रमेणेत्यर्थः ॥ तदिति ॥ ननु सिद्धांते
प्रत्यक्षज्ञानकरणमिंद्रियसन्निकर्षः किं तु स्यादिति चेदाह ॥ तत्करणमिति ॥ प्रत्यक्षप्रमाणं निगमयति ॥ तस्मादिति ॥ प्रत्यक्षप्रमाकरण
त्वादित्यर्थः ॥ सिद्धमिति ॥ न्यायसिद्धांते सिद्धमित्यर्थः ॥ छ ॥ छ ॥ इति तर्कसंग्रहपदकृत्यके प्रत्यक्षपरिच्छेदः समाप्तः ॥ छ ॥ छ ॥

प्रथमशब्दस्य साक्षात्कारे श्रोत्रमनःसंयोगो व्यापारः द्वितीयतृतीयेतु शब्देवेत्यस्यार्थः ॥ =पं३ पर्यायः =

मितिकरणेनेन प्रत्यक्षज्ञानैः स्वार्थग्रहणम् = ६

प्रत्यक्षानुमानयोः कार्यकारणभाव संगतिमभिप्रेत्य प्रत्यक्षानंतरमनुमानं निरूपयति ॥ अनुमितिरिति ॥ अनुमितेः करणमनुमा
नमित्यर्थः ॥ तच्च लिंगपरामर्श एवेति निवेदयिष्यते ॥ कुठारादावतिव्याप्तिवारणाय अनुमितिरिति ॥ प्रत्यक्षादावतिव्याप्तिवारणाय
अन्विति ॥ नन्वनुमितेरेव दुर्निरूपत्वात् तद्घटितानुमानमपि दुर्निरूपमित्यत आह ॥ परामर्शेति ॥ प्रत्यक्षादिवारणाय परामर्शजन्येति परामर्शध्वंसवारणाय
ज्ञानमिति परामर्शप्रत्यक्षवारणाय हेतुविषयकमित्यपि बोध्यं ॥ व्याप्तिविशिष्टेति ॥ विशेष्यता संबंधेन व्याप्तिविशिष्टं पक्षधर्मताज्ञानमिति स परामर्श इत्यर्थः ॥
घटादिज्ञानवारणाय पक्षधर्मतेति धूमवान्पर्वतः इत्यादिज्ञानवारणाय व्याप्तिविशिष्टेति ॥ तदिति ॥ परामर्शजन्यमित्यर्थः ॥ यत्रयत्रधूम इति ॥ यत्र धूम यत्र=१२
स्तत्र तत्राग्निरिति व्याप्तेरभिनयः ॥ साहचर्यनियम इति लक्षणं ॥ सह चरतीति सहचरस्तस्य भावः साहचर्यं समानाधिकरण्यमिति यावत् तस्य निय
मो व्याप्तिरित्यर्थः सचाव्यभिचरितत्वं तच्च व्यभिचाराभावः व्यभिचारश्च साध्याभाववद्वृत्तित्वं तथा च साध्याभाववदवृत्तित्वं व्याप्तिरिति पर्यवस
न्नं वह्निमान् धूमादित्यादौ साध्यो वह्निस्तदभाववान् जलह्रदादिस्तद्वृत्तित्वं नो कदाचन वृत्तित्वं प्रकृते हेतुभूते धूमे इति कृत्वा लक्षणसमन्वयः
धूमवान्वह्नेरित्यादौ साध्यो धूमस्तदभाववदयोगोलकं तद्वृत्तित्वमेव वह्न्यादौ वर्तते नातिव्याप्तिः ॥ ननु ज्ञातेयं व्याप्तिः पक्षधर्मताज्ञानमित्य
त्र का नाम पक्षधर्मतेत्यपेक्षमाणं प्रति तत्स्वरूपं निरूपयति ॥ व्याप्यस्येति ॥ व्याप्यो नाम व्याप्त्याश्रयः स च धूमादिरेव तस्य पर्वतादिनिरूपितवृ
त्तित्वं पक्षधर्मतेत्यर्थः ॥ अथ कथमनुमानमनुमितिकरणं कथं वा तस्मादनुमितेर्जनिरिति जिज्ञासमानं प्रति लाघवादनुमाने विभागमुखेनैव बोधयिष्यन्नु
मानं विभजते ॥ अनुमानमिति ॥ द्वैविध्यं दर्शयति ॥ स्वार्थं परार्थं चेति ॥ स्वस्यार्थः प्रयोजनं यस्मात्तत्स्वार्थमिति समासः ॥ स्वप्रयोजनं च स्वस्यानुमेय
प्रतिपत्तिः ॥ एवं परार्थमित्यस्यापि ॥ अयमिति ॥ व्याप्तिबलेन लीनमर्थं गमयतीति लिंगं तच्च धूमादिस्तस्य परामर्शो ज्ञानविशेषः इत्यर्थः ॥ तस्मादिति ॥
लिंगपरामर्शादित्यर्थः ॥ स्वार्थमुपसंहरति ॥ तदेतदिति ॥ यस्मादिदं स्वयमेव प्रतिपत्तिहेतुस्तस्मादेतत्स्वार्थानुमानमित्यर्थः ॥ क्रमप्राप्तं परार्थ

[illegible]

पर्वतनिष्ठाधिकरणतासे वधारतातन्निरूपिताधे यताशालिधूमेव =५ ताहशाधेयता

इयत्वं चावयववाक्यं तत्परार्थानुमानमिति संबंधः ॥ अवयवेति ॥ अथावयवत्वं नाम द्रव्यसमवायिकारणं प्रतिज्ञादिषु तत्संभवात्कथमेतेऽवयवाः स्युरि
ति चेदनुमानं वाक्यैकदेशत्वादवयवा इत्युपचर्यंत इति गृहाण ननु एवमपि पंचावयववाक्यस्यानुमानत्वमेव विचारसहं तस्य लिंगपरामर्शत्वाभा
वादिति चेन्नैवं लिंगपरामर्शप्रयोजकलिंगप्रतिपादकत्वेनानुमानमित्युपचारमात्रत्वात् ॥ तदुदाहरति ॥ यथेति । तथा चायमिति ॥
५ अयं च पर्वतस्तथा वह्निव्याप्यधूमवानित्यर्थः ॥ तस्मात्तथेति ॥ वह्निव्याप्यधूमवत्वात्तथा वह्निमानित्यर्थः ॥ अनेनेति ॥ अनेन पं
चावयववाक्येनेत्यर्थः ॥ ननु पंचावयववाक्यमित्यत्र के ते पंचावयवाः अत आह दर्शयति । प्रतिज्ञेति ॥ प्रतिज्ञाद्यन्यतमत्वं अवयवत्वं । सा
ध्यविशिष्टपक्षबोधकवचनं ॥ प्रतिज्ञा पंचम्यंतं तृतीयांतं वा । लिंगवचनं हेतुः व्याप्तिप्रतिपादकं ॥ दृष्टांतवचनमुदाहरणमु
दाहृतं व्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः ॥ पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनं इदमेव लक्ष
णं हृदि निधाय प्रतिज्ञादीन्विशिष्टदर्शयति पर्वतो वह्निमानित्यादिना ॥ लिंगेति ॥ ज्ञायमानं लिंगमनुमितिकरणमिति नव्योक्तं युक्तं ॥
इयं यज्ञशाला वह्निमती अतीतधूमादित्यादौ लिंगाभावेऽप्यनुमितिदर्शनादित्यभिप्रायः लिंगपरामर्शः करणमित्याचष्टे लिंगप
रामर्श एवेति ॥ अनुमानमुपसंहरति ॥ तस्मादिति ॥ अनुमितिकरणत्वादित्यर्थः ॥ अयमेव तृतीयज्ञानमुच्यते ॥ तथाहि महानसा
दौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादि पक्षे पर्वते वह्निव्याप्यत्वेन यद्धूमज्ञानं तद्द्वितीयं ततस्तृतीयं । इदमेव लिंगपरा
मर्श इत्युच्यते ॥ अनुमानमिति ॥ व्यापारवत्कारणं करणमिति मते व्याप्तिज्ञानमेवानुमानं लिंगपरामर्शो व्यापार इत्यवसेयम् ॥ फ
लयोगव्यवच्छिन्नं कारणं करणमिति मते तु लिंगपरामर्श एवानुमानमिति भावः ॥ अन्वयव्यतिरेकिणः लक्षणमाह ॥ अन्वयेने
ति ॥ तृतीयायाः प्रयोज्यत्वमर्थः । साध्यसाधनयोः साहचर्यमन्वयः ॥ तदभावयोः साहचर्यं व्यतिरेकः (तथा चान्वयप्रयोज्य
व्याप्तिमद् यं व्यतिरेकीत्यर्थः) केवलव्यतिरेकिणि अति व्याप्तिवारणायान्वयेनेति केवलान्वयिनि अव्यभिचारवारणाय व्यतिरेकिणेति
तथा अन्वयव्याप्तिरूपं प्रदर्शितैव । व्यतिरेकव्याप्तिश्च साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः ॥ तदुक्तं ॥ व्याप्यव्यापकभावो
हि भावयोर्यादृगिष्यते तयोरभावयोस्तस्माद्विपरीतः प्रतीयते अन्वये साधनं व्याप्यं साध्यं व्यापकमिष्यते साध्याभावोऽन्यथा
व्याप्यो व्यापकः साधनात्ययः इति ॥ केवलान्वयिनो लक्षणमाह ॥ अन्वयेति ॥ अन्वयेनैव व्याप्तिर्यस्मिन्स्तथा प्रमेयत्वाभिधेयत्वप्र
व्यतिरेकव्याप्तिं निराकरोति ॥ अत्रेति ॥ अभिधेयत्वसाधकानुमाने इत्यर्थः ॥ ननु कुतस्तन्निषेधोऽत्र हेतुमाह । सर्वस्येति ॥

फलयोगे अव्यवच्छिन्नं नाम संयुक्तं यत्कारणं तदेव करणमित्यर्थः यथा रामेन बाणेन हतो वाली=८ चा=१६

त्य=२

तथा चान्वयप्रयोज्यव्याप्तिमत् व्यतिरेकप्रयोज्यव्याप्तिमत्त्वे यत तस्य अन्वयव्यतिरेकीत्यर्थः=६ अस्य यथा नाम व्यतिरेकव्याप्ती =३

एव=९

व=११

शिवः ५

त्ये=२ चे=९

पदार्थमात्रस्येत्यर्थः तथा च सकलपदाभिधेयत्वस्येश्वरप्रमाविषयत्वस्य चात्यंताभावाप्रतियोगित्वरूपकेवलान्वयित्वेन तदभावाप्रसिद्ध्यात द्घटित
व्यतिरेकव्याप्तिर्नसंभवतीवेतिभावः ॥ केवलव्यतिरेकिणोलक्षणमाह ॥ व्यतिरेकेति ॥ व्यतिरेकेणैव व्याप्तिर्यस्मिन्सतथा ऽन्वयव्यतिरेकिण्य
तिव्याप्तिवारणाय मात्रेति ॥ नचेयंतथेति ॥ इयं पृथिवीतथा गंधाभाववतीत्यर्थः । तस्मान्नेतथेति ॥ गंधाभाववत्वाभावादितरभेदा
भाववतीनेत्यर्थः ॥ नन्वत्रकिमितिनान्वयव्याप्तिरित्याशंक्य परिहरति ॥ अत्रेति । इतरभेदसाधकानुमानइत्यर्थः इदमपिलक्षणंजीव
प्रा=५ शरीरं सात्मकं प्राणादिमत्वात् यन्नैवं तन्नैवं यथा घटः प्रत्यक्षादिकं प्रमाणमितिव्यवहर्तव्यं प्रमाकरणत्वात् यन्नैवं यथा प्रत्य
क्षाभासः विवादास्पदं माकाशमितिव्यवहर्तव्यं शब्दवत्वात् इत्यादिकमपि केवलव्यतिरेकीति द्रष्टव्यं अथ पृथिवीमात्रस्य पक्षत्वादित्यत्र किंनामप
क्षतेत्यपेक्षायां तान्निर्वक्ति ॥ संदिग्धेति ॥ सपक्षवारणाय संदिग्धेति ॥ निश्चितेति ॥ पक्षेति ॥ व्याप्तिवारणाय निश्चितेति ॥ तत्रैवेति ॥
धूमवत्वे हेतावेवेत्यर्थः ॥ साध्येति ॥ सपक्षेति व्याप्तिवारणाय साध्याभावेति ॥ प्रकृते दर्शयति ॥ अन्वयव्यतिरेकि पंचरूपोपपन्नं स्वसाध्यं
साधयितुं क्षमते तानिकानि इति चेद् ब्रूयतां पक्षधर्मत्वं सपक्षेसत्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वं असत्प्रतिपक्षत्वं चेति ॥ अ
बाधितं साध्यं रूपोविषयोयस्य तत्तथोक्तं तस्य भावस्तत्वं एवं साध्याभावसाधकं हेत्वंतरं यस्य सः सत्प्रतिपक्ष इत्युच्यते स नास्ति
यस्य सोऽसत्प्रतिपक्षस्तस्य भावस्तत्वमिति बोध्यं केवलान्वयि तु चतुःरूपोपपन्नमेव स्वसाध्यं साधयितुं क्षमते तस्य विपक्ष
विपर्ययाद्व्यावृत्यभावेन तद्व्यावृत्ति विपर्ययात् केवलव्यतिरेक्यपि तथा तस्य सपक्षविपर्ययेण तत्सत्वविपर्ययादिति हेतून्निरूप्यप्र
संगाद्धेत्वाभासानाह ॥ सव्यभिचारेति ॥ उपदर्शितरूपाणांमध्ये कतिपयरूपोपन्नत्वाद्धेतुवदाभासंते इतिहेत्वाभासाः तत्वं चानुमि
तितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वं बाधस्थले वह्निरनुष्ण इत्यनुमितिप्रतिबंधकत्वे पदज्ञानमुष्णत्वं वत्वाभावसेनु
ष्णत्वसाधकद्रव्यत्वमित्याकारकं तद्विषयतस्य द्रव्यत्वरूपहेत्वाभासे सत्वात् लक्षणसमन्वयः ॥ सद्धेतुवारणाय यथार्थेति घटादिवार
णाय अनुमितिः ॥ तत्करणप्रतिबंधकेति ॥ व्यभिचारादिव्याप्तिवारणाय अनुमिति तत्करणान्यतरेति ॥ तत्रेति ॥ साधारणा
दित्रितयमध्ये इत्यर्थः ॥ अथ विरुद्धेतिप्रसक्तिरिति मास्मभूदस्य सपक्षत्वसत्वस्यापि निवेशात् ॥ अथैवमपि स्वरूपासिद्धे दूषणं
जागर्ति इति मा गर्वं सवर्वं पक्षत्वस्यापि तथात्वात् ॥ पक्षमात्रेति ॥ सर्वेयेसपक्षाविपक्षास्तेभ्यो व्यावर्तत इति व्याख्यातः ॥ के
वलव्यतिरेकिवारणाय तद्भिन्न इत्यपि देयं ॥ अन्वयेति ॥ केवलान्वयिवारणाय अन्वयेति ॥ केवलव्यतिरेकिवारणाय व्यतिरे

शुक्तौ इदं रजतमित्यत्र शुक्तौ रजतस्याभासो वर्तते नतु साक्षात् रजतः

व्या=९ =६

त्यादि=६

स्वेन साध्यं स्वसाध्यं यत्पंचरूपोपपन्नं स्वसाध्यमन्वयव्यतिरेकि तत्साधयितुं क्षमते साधनकरणेनूसमर्थो भवति = तानि कानि पंचरूपाणि ॥ =८

न्त=१४

६

॥ग्रन्थेति॥ उपदर्शितानुमानइत्यर्थः॥ विरुद्धं लक्षयति॥ साध्येति॥ सद्धेतुवारणाय साध्याभावव्याप्त इति सत्प्रति पक्षवारणाय सत्प्रति पक्षभिन्न
इत्यपि वोध्यं कृते पि कार्यत्वादित्यर्थः कृतकत्वमिति अनित्यत्वेन व्याप्तमिति। यद्यत्कृतकत्वं तत्तदनित्यमिति व्याप्तिर्भवति तथैव तथेतिभावः॥
सत्प्रतिपक्षं लक्षयति॥ साध्येति॥ यस्य हेतोः साध्याभावसाधकं नाम साध्याभावस्यानुमापकं हेत्वन्तरं प्रतिपक्षे हेतुर्विद्यते यस्य स हेतुः
सत्प्रतिपक्ष इत्यर्थः अयमेव प्रकरणसम इत्युच्यते मुक्तावल्यादिग्रन्थे॥ विरुद्धवारणाय हेत्वंतरं यस्येति वन्ह्यादि साध्यवारणाय
ज्ञः=५ साध्याभावेति॥ असिद्धं विभजते॥ असिद्ध इति॥ आश्रयासिद्धास्यन्यतमत्वमसिद्धत्वं॥ आश्रयासिद्धत्वंच पक्षतावच्छेदकाभा
ववत्वं भवतीति अरविंदत्वे गगनतावच्छेदकाभाववत्वं अरविंदरूपपक्षे गगनीयत्व विरहात् ननुकथमरविंद गगनीयत्व विरह अ
तआह॥ अत्रेति॥ उपदर्शितानुमानइत्यर्थः॥ पक्षेति॥ सद्धेतावतिव्याप्तिवारणाय पक्ष इति॥ घटादिप्रभाववारणाय हेत्विति
सोयं स्वरूपासिद्धः शुद्धासिद्धभागासिद्ध विशेषणासिद्ध विशेष्यासिद्धभेदेन वहुविधः तत्राद्यस्तूपदर्शित एव॥ द्वितीयो यथा॥ उद्भूतरू
पादिचतुष्टयं गुणरूपत्वादित्यत्र रूपत्वहेतोः पक्षैकदेशावृत्तित्वेन स्वरूपासिद्धत्वं॥ तृतीयो यथा॥ वायुः प्रत्यक्षरूपवत्वे सति स्पर्शवत्वादि निर्वाहो भवति=१०
त्यत्र रूपवत्व विशेषणस्य वायावसत्वेऽपि विशिष्टस्पर्शवत्वेपि तथात्वेन तस्य स्वरूपासिद्धत्वं निर्वहति विशेषणाभावे विशिष्टस्याप्यभावात्॥
स्पर्शवत्वे सति रूपवत्वात्=११ ॥ तुरीयो यथा॥ अत्र विशेषणविशेष्ययोर्वैपरीत्येन हेतुः तस्य स्वरूपासिद्धत्वं तु विशेष्याभावप्रयुक्त विशिष्टाभावादिति वोध्यं॥ व्याप्य
त्वासिद्धं निरूपयति॥ सोपाधिक इति॥ ननु को यमुपाधिरतआह॥ साध्येति॥ साधनाव्यापक उपाधिरित्युक्ते शब्दोनित्यः कृतक
त्वादित्यत्र सामान्यवत्वे सति अस्मदादिवाह्येन्द्रियग्राह्यत्वमप्युपाधिः स्यात् तदर्थं साध्यव्यापकत्वं इत्युक्तं तावत्युक्ते सा प्य=९
मान्यवत्वादिनोक्तित्युत्व साधनेकृतकत्वमुपाधिः स्यात् तदर्थं साधनाव्यापक इत्युक्तं उपाधिभेदमादायासंभववारणाय व्यापकेत्व कत्वं=४
ञ्जः=१५ शरीरे व्यापक तयद साध्ये साधनभेदमादाय साधनस्योपाधित्व वारणाय व्यापक शरीरे त्वंतपदमादावव श्यकं देयं॥ सोपाधिस्त्रिवि
धः॥ केवलसाध्यव्यापकः॥ पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चेति॥ तत्राद्य उपदर्शितः एवं
तर्वर्तिनी हिंसाऽधर्मजनिका हिंसात्वात् क्रतुवाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः तस्याधर्मजनकत्वं तत्र निषिद्धत्वमिति साध्य
व्यापकता यत्र हिंसात्वं तत्र न निषिद्धत्वमुपाधिः साधनाव्यापकता क्रतुहिंसायां निषिद्धत्वस्याभावात् न हिंस्यात्सर्वा भूतानि॥ इ
ति सामान्यवाक्यतः पशुनायजेतेत्यादि विशेषवाक्यस्य वलीयस्त्वात् अतो हिंसात्वं नाधर्मजनकत्वे प्रयोजकमपितु निषिद्धत्व शिवः हि
इति=२

योः=२ हिषित=२

तस्य यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वं रूपे व्यभिचारात् किंतु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदवच्छिन्नं व। हिः प्रत्यक्षत्वं यत्र तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव ॥ आत्मनि व्यभिचारवारणाय बहिरिति यत्र प्रत्यक्षस्प र्शाश्रयत्वं तत्रोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं वायावुद्भूतविरहात् ॥ तृतीयो यथा ॥ प्रागभावो विनाशी जन्यत्वादित्यत्र भावत्वमुपा धिः ॥ तस्य यत्र विनाशित्वं तत्र भावत्वमिति न केवलं साध्यव्यापकत्वं प्रागभावे भावत्वस्य विरहात् किंतु जन्यत्वरूपसाधनावच्छिन्न विनाशित्वं यत्र तत्र भावत्वमिति साधनावच्छिन्नसाध्यव्यापकत्वमेवास्ति यत्र जन्यत्वं तत्र न भावत्वमिति साधनाव्यापकत्वं ध्वंसे भावत्वविरहात् एवं स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजन्यत्वमुपाधिः श्यामत्वस्य नीलघटेपि सत्त्वात् न केवलं साध्यव्यापकं किंतु साधनावच्छिन्नसाध्यव्यापकत्वमेव अष्टमे पुत्रे शाकपाकजन्यत्वविरहेण साधनाव्यापकत्वेत्यादिकमपि द्रष्टव्यम् ॥ यस्येति ॥ सद्धेतुवारणाय प्रमाणांतरेणेति ॥ घटादिवारणाय साध्येति ॥ ॥ इति पदकृत्येऽनुमितिखंडः ॥ ॥ श्रीरामाय नमः ॥ ॥ शुभमस्तु ॥ श्रीः ॥ अवसरसंगतिमभिप्रेत्यानुमानांतरमुपमितिमानं निरूपयति ॥ उपमितिः ॥ उपमितेः करणमुपमानमित्यर्थः ॥ कुठारादिवारणाय उपमितेः ॥ प्रत्यक्षादिवारणाय उपेति ॥ संज्ञासंज्ञीति ॥ अनुमित्यादिवारणाय संबंधेति ॥ संयोगादिवारणाय संज्ञासंज्ञीति ॥ अयं गवयपदवाच्य इति ॥ गवयो गवयपदवाच्य इत्यर्थः तत्र गवयांतरे शक्तिग्रहाभावप्रसंग इति दूषणं मन्यान्यत्रं ॥ तथा च गोसादृश्यविशिष्टपिंडज्ञानं करणं अतिदेशवा क्यार्थस्मरणमवांतरव्यापारः उपमितिः फलमिति सारं ॥ तच्चोपमानं सादृश्यविशिष्टपिंडज्ञानमसाधारणधर्मविशिष्टपिंडज्ञानं वै धर्म्यविशिष्टपिंडज्ञानं च ॥ तत्राद्यमुक्तमेव ॥ द्वितीयं यथा ॥ खड्गमृगः कीदृगिति पृष्टे नासिकालसदेकशृंगोस्तीति कोतगजा ॥ तिश्रुत्वेति ॥ तच्छ्रुत्वाऽप्यश्रुत्वा कालांतरेण तादृशपिंडं पश्यन्नतिदेशवाक्यार्थं स्मरति ॥ तदनंतरं खड्गः खड्गपदवाच्य इत्युपमितिरु त्पद्यते ॥ अत्र नासिकालसदेकशृंगमेवासाधारणधर्मः ॥ तृतीयो यथा ॥ उष्ट्रः कीदृगिति पृष्टे अश्वादिसाम्यं दृष्टेन इत्युक्त ग्री वा शरीरश्चेति ॥ श्रुत्वेति कालांतरेण तत्पिंडदर्शनादि धर्म्यविशिष्टपिंडज्ञानं ततोऽतिदेशवाक्यार्थस्मरणं ततः उष्ट्रः उष्ट्र पदवाच्य इत्युपमितिरुत्पद्यते ॥ इति पदकृत्ये उपमानखंडः ॥ ॥ श्रीः ॥ कृष्णाय नमः ॥ श्रीः ॥ ॥ श्रीः ॥ शुभमस्तु ॥ अवसरसंगतिमभिप्रेत्य प्रमाणांतरं निरूपयति ॥ आप्तेति ॥ शब्दः ॥ भ्रांतविप्रलंभकयोर्वाक्यस्य शब्दप्रमाणवारणाय आप्तेति ॥ ननु कोयं आप्त इत्यत आह ॥ आप्तस्त्विति ॥ यथार्थवक्ता ॥ यथाभूतावाधितार्थोपदेशा घटादिसमूहवारणाय पदेति ॥ शक्तमिति ॥ निरू पकतासंबंधेन शक्तिविशिष्टमित्यर्थः ॥ अस्मादिति ॥ घटपदात् घटरूपपदार्थो बोधव्य इतीश्वरेच्छारूपशक्त्यर्थः ॥ अर्थस्मृत्यनु

Marginal notes (left):

प्रतिबंधितैः तः सन्तूपि व्यजिज्ञासानिरूत्यर्थमव स्थापकत्वं अवसरत्वं=९

तिः=९

पिं=

शब्दार्थयोः निरूप्यनिरूपकताभावसंबंधः=१
शब्दः निरूपकः अर्थः निरूप्यः=१

Marginal notes (right):

एकस्मिन्धर्मिणि अन्यधर्मारोपोऽति देशः=११

अश्वादितुल्यपृष्ठः=२

तस्मात्=५

घटपट इतिशब्दानांसमूहः=२

Notes (bottom):

यथाभवति तथा कथनत्वं
यथाभूतत्वम्=२

अबाधितार्थस्योपदेष्टा
उपदेशकारकोऽर्थः=२

ऽदौ=१

शो = २

किंभवति = १ सिद्धहोजावेगी = २ जहदजहल्लक्षणा इयं

॥ अथ लक्षणां शक्यसंबंधो लक्षणा सा च त्रिविधा ॥ जहत् अजहत् जहदजहत् इति भेदात् वर्तते च गंगायां घोष इत्यत्र गंगापदशक्यप्रवाहसंबंधस्तीरे ॥ लक्षणा
बीजं तु तात्पर्यानुपपत्तिः ॥ अतएव प्रवाहे घोषतात्पर्यानुपपत्तेस्तीरे लक्षणेत्युक्तं ॥ कुन्तिलो यान्ति इत्यादौ द्वितीया धावतीत्यादौ तृ
तीयां पदस्येति ॥ असंभववारणाय यदंतरयत्ति रेकु प्रयुक्तेति । पुनरसंभववारणाय पदांतरेति ॥ अर्थेति ॥ आकांक्षावारणाय अर्थेति ॥ पदाना
मिति ॥ असहोच्चारितेषु अतिव्याप्तिवारणाय अविलंबेनेति ॥ आकांक्षादिवारणाय पदानामिति ॥ आकांक्षादिभूत्वा वाक्यस्य प्रमाणत्वं निषेधय
ति ॥ तथाचेति ॥ आकांक्षादिकं शाब्दहेतुरित्युक्तं चेत्यर्थः ॥ तथेति ॥ अनाकांक्षाद्युक्तोदाहरणं दर्शयति ॥ नन्वेतावती शाब्दसामग्री प्रपंचि
विभाजकवाक्ये शाब्दबोधस्योपदिष्टत्वेन नाम उपदेशाकारकत्व = ६ ता विभाजकवाक्ये शाब्दस्योपदिष्टत्वेन तत्प्रकारो न प्रदर्शितमित्यत आह ॥ वाक्यार्थेति ॥ शाब्दत्वं च शब्दात् प्रतीयतेऽनुभवसिद्धा जातिः ॥
शाब्दबोधक्रमो यथा ॥ चैत्रः ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमनानुकूलवर्तमानकालिककृतिमांश्चैत्रः ॥ इति शाब्दबोधः ॥ द्वि
तीयायाः कर्मत्वमर्थः ॥ धातोर्गमनमनुकूलत्वं च संसर्गमर्यादया भासते ॥ लटो वर्तमानत्वमाख्यातस्य कृतिः तत्संबंधः संसर्गमर्यादया
भासते गौरयोगच्छतीत्यत्र गमनानुकूलव्यापारवान् इति शाब्दबोधः ॥ स्नात्वा गच्छतीत्यत्र गमनप्रागभावावच्छिन्नकालीनस्नानकर्म
क गमनानुकूलवर्तमानकालिककृतिमान् इति शाब्दबोधः ॥ क्त्वाप्रत्ययस्य कर्तृगमनपूर्वकालीनत्वं चार्थः ॥ एवमन्यत्रापि वाक्ये बोधव्यं ॥
अर्थं यथार्थानुभवं विभजते ॥ अयथार्थेति ॥ संशयं लक्षयति ॥ एकस्मिन्निति ॥ एकस्मिन्धर्मिणि एकस्मिन्नेव पुरोवर्तिनि
पदार्थे विरुद्धव्यधिकरणयोर्नानाधर्मैः स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्ट्यसंबंधः तदवगाहि ज्ञानं संशयः इत्यर्थः ॥ घटपटादि
विषयसमूहालंबनज्ञानस्य घटत्वरूपविरुद्धनानाधर्मवैशिष्ट्यावगाहित्वात् अतिप्रसक्तिवारणाय एकस्मिन्निति ॥ घटोऽयं पृथिवीति ज्ञान
स्य एकस्मिन्धर्मिणि घटे घटत्वपृथिवीत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसंगवारणाय विरुद्धेति ॥ घटत्वविरुद्धपटत्व
वान् पटः इति ज्ञानेऽतिप्रसक्तिवारणाय ज्ञानेति ॥ मिथ्येति ॥ यथार्थज्ञानवारणाय मिथ्येति ॥ मिथ्यार्थवारणाय ज्ञानेति ॥
तर्कं लक्षयति ॥ व्याप्येति ॥ असंभववारणाय व्याप्यारोपेति ॥ पुनरसंभववारणाय व्यापकारोप इति ॥ अत्र वह्न्यभावो व्याप्यः
धूमाभावो व्यापकः यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथग्विभागोऽनुचितः तथापि प्रमाणानुग्राहकत्वात्सोऽनुचित इति
बोध्यम् ॥ स्वप्नस्तु उदितेषु शांतेषु इंद्रियेषु संयोगसिद्धौ नाड्यां वा मनसि स्थिते दृष्टविशेषेणधातुदोषेण वा जन्यते स च मानसविपर्यये तर्भूतः ॥ सु
खं निरूपयति ॥ सर्वेषामिति ॥ सर्वात्मनुकूलमिति बोध्यम् यत्सुखमित्यर्थः अहं सुखीत्यनुभवसिद्धसुखत्वजातिमद्धर्ममात्रासाधारणकार

त = २

कुत्रिणः समी पवर्तिनः ३ धाः यांतीत्यर्थः २

मीत्य = ६

कुतः संबंधमात्र इत्याकारक = ८

अग्रे = ११

द्रव्यत्व = ६

वक्ष्य = ४

पृथग्विभाग ३

शिवः १

॥इच्छां निरूपयति॥इच्छेति॥कर्मइति पर्य्याय इच्छात्व जाती मती च्छा साच्द्विधा फले च्छा पाये च्छा च फलं सुखादिकं उपायो यागादि॥द्वेषं
निरूपयति॥क्रोध इति॥द्वेषमीत्यनुभव सिद्ध द्वेषत्व जातिमान् द्विष्ट साधनता ज्ञान जन्य गुणो वा द्वेषः॥प्रयत्नं निरूपयति॥कृतिरिति कृति
त्वत्वजातिमान प्रयत्नः॥सत्रिविधः॥प्रवृत्तिः जीवनयोनि निवृत्ति भेदात्॥इच्छाजन्यो गुणो प्रवृत्तिः द्वेषजन्यो गुणो निवृत्तिः जीवना
दृष्टजन्यो गुणो जीवनयोनिः॥सच प्राणसत्वाऽकारणं धर्म माह॥विहितेति॥वेद विहिते त्यर्थः॥अधर्मवारणाय वेद विहितेति॥यागादि
क्रियावारणाय कर्मजन्य इति॥सच कर्मनाशा जलस्पर्श कीर्तने न भोगतत्त्वज्ञानादी नां नाशः॥अधर्मलक्षणमाह॥निषिद्धेति॥
वेदेनेत्यर्थः॥धर्मवारणाय वेद विरुद्धेति निषिद्ध वारणाय कर्मजन्य इति स च भोगप्राय श्चित्तादि नानश्यति एते अवयवाद् दृष्टमिति।
कथ्यंते॥वासनाजन्यो च वासना विलक्षण संस्कारं विसंस्कारं विभजते॥संस्कारेति॥सामान्यगुणात्म विशेषगुणोभयवृत्तिः॥गुणत्व
व्यापकोतिमानं संस्कारः घटादिवारणाय गुणत्वव्याप्येति संयोगादिवारणायऽऽत्म विशेषगुणोभयवृत्तीति ज्ञानादिवारणाय सामा
न्यगुणेति॥द्वितीयाद्य पतनासमवायिकारणं वेगः॥रूपादिवारणाय द्वितीयाद्य पतनेति॥कालादिवारणाय असमवायीति॥भावनां
लक्षयति॥अनुभवेति॥आत्मादिवारणाय प्रथमदलं अनुभवध्वंस वारणाय द्वितीयदलं॥स्थितिस्थापकमाह॥अन्यथेति॥पृथिवीमात्र
समवेत संस्कार व्याप्य जातिमत्वं स्थितिस्थापकत्वं॥गंधत्व मादाय गंधेति व्याप्ति वारणाय संस्कार व्याप्येति॥भावनात्व मादाय भावना वारणा
य पृथिवी समवेत समवेतेति समवेतेति स्थितिस्थापक रूपान्यतरत्व मादाय रूपवारणाय जातीति॥गुणेति॥द्रव्यकर्म भिन्नत्वे स
ति सामान्यवान् गुणः॥द्रव्यकर्मणोरतिव्याप्ति वारणाय विशेषणं सामान्यादावतिव्याप्ति वारणाय विशेष्यं॥कर्मनिरूपणं विभजते॥चलनेति॥
संयोग भिन्नत्वे सति संयोगासमवायिकारणं कर्मणो लक्षणं॥हस्त पुस्तक संयोगवारणाय सत्यंतं॥घटादिवारणाय विशेष्यदलं॥ऊ
र्द्धेति॥अवक्षेपणवारणाय ऊर्द्धेति॥कालादिवारणाया ऽसाधारणेत्यपि बोध्यं॥अधोदेशेति॥उत्क्षेपणवारणायाऽधोदेशेति॥काला
दिवारणाय साधारणेत्यपि बोध्यं॥शरीरेति॥प्रसारणादि वारणाय शरीरेति॥सन्निकृष्टेति॥कालादिवारणाय साधारणेत्यपि बोध्यं॥
विप्रकृष्टेति॥उत्क्षेपणादिवारणाय प्रकृष्टेति कालादिवारणाय साधारणमवश्यकम्॥नित्यमिति॥संयोगादिवारणाय नित्यमिति॥का
लादिवारणाय अनेकेति अनेकानुगतंत्वा ॥विशेषं विभजते॥नित्यद्रव्यवृत्तय इति॥आत्मत्व
मनस्त्ववारणायात्ममनो भिन्नत्वे सतीत्यपि बोध्यं॥समवायं विभजते॥समवायस्येति आकाशादिवारणाय संबंध इति॥संयोग
वारणाय नित्य इति॥स्वरूपसंबंधवारणाय तद्भिन्नत्वमपि बोध्यं॥प्रागभावं लक्षयति॥अनादिरिति॥घटादिवारणाय प्रथम दलं॥पर
माणु वारणाय द्वितीयदलं॥पुनः प्रागभावः एकस्मिन्कालेऽस्तीत्यत आह॥वर्त्तते रिति॥कार्य्यस्योत्पत्तेः प्रागस्य प्रतियोगि स

८ त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिताकोऽभावोऽत्यन्ताभावोऽत्यन्ताभावः ध्वंसप्रागभाववारणाय त्रैकालिकेति भेदवारणाय संसर्गेत्यादि ॥ अत्य
न्तोन्याभावं लक्षयति ॥ तादात्म्येति ॥ प्रागभावप्रध्वंसाभाववारणाय तादात्म्येति अत्यन्ताभाववारणाय तादात्म्यत्वेन संबंधो विशेषणीयः ॥ पदा
र्थपरमप्रयोजनं मोक्षं दर्शयति मनंतेति सत्व अत्यंत तत्त्वैकविंशति दुःखध्वंस अत्यंतकत्वं च स्वसमानाधिकरणदुःखप्रागभावास्वसमानाधिःकाली
४ नत्वं दुःखध्वंसस्येदानीमपि सत्वात् अस्मदादीनामपि मुक्तत्वापत्तिवारणाय कालीनत्वं मुक्त्यात्मक दुःखध्वंसस्यात्वदीयदुःखप्रागभा
वसमानकालीनत्वाद्वामदेवादीनां मुक्त्यात्मनामपि असुकृत्वप्रसंगात् स्वसमानाधिकरणेति प्रागभावविशेषणं दुःखाच्चैकविंशति शा
रीरं षडिंद्रियाणि षड्विषयाः षड्बुद्ध्यादयः सुखं दुःखं चेति ॥ दुःखानिसंगीत्वाच्छरीरादीनां गौणत्वात् दुःखत्वं ॥ तथा च श्रुतिः ॥ आ
त्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति श्रुतेः ॥ आत्मज्ञानसाधननिदिध्यासनस्य पदार्थज्ञाने संज्ञाघटिति ॥ एवं च
सति तत्त्वज्ञाने शरीरपुत्रादावात्मस्वकीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशस्तेन दोषाभावस्तेन प्रवृत्त्यनुत्पत्तिस्तत्कालीनशरी
रेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां प्रारब्धकर्मणां नाशः ततो जन्माभावः नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयं ज्ञानं च
विमलीकुर्वन्नभ्यासेन च पाचयेत् अभ्यासात्पक्वविज्ञानं कैवल्यं लभते नर इत्यादिवचनात् ॥ तमेव विदित्वातिमृत्युमेति
श्रुतेः सगुणोपासनाकाशीमरणादेरपि तत्त्वज्ञानद्वारा साधनीभूतमुक्तिहेतुत्वं अतएव परमेश्वरः काश्यां तारकमुप
दिशतीति सारम् ॥ इति श्री चंद्रजसिंहविरचितायां पदकृत्यके चतुर्थखंडः समाप्तम् ॥ शुभम् ॥ श्रीरस्तु ॥ श्रीः ॥
॥ सं० १९३३ कार्तिक प्र० २३ जम्बूदेशे ॥ शुभम् ॥ शालिग्रामेण लिखितम् ॥ शुभम् ॥ श्री ॥ श्री ॥ श्री ॥

॥ श्री ॥ श्रीगुरुनानकाय नमः ॥ श्री ॥